

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.20.1.3.4
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

# पाश्चात्य मते स्वप्न सिद्धान्ताः – एकं विश्लेषणम्

PURANAM VENKATA NAGA KISHORE
M.Phil (Sanskrit), B.Ed
Research Scholar
Sri Venkateswara University
Tirupati
Mail-ID: kishore.kanvasa@gmail.com

## प्रस्तावना

विश्वं जाग्रत्, स्वप्न, सुषुप्ति, तुर्यावस्थाभिः विचित्रितमिति दक्षिणामूर्तिस्तवे शङ्करपादैः वर्णितम्। जाग्रदवस्याथाः सर्वानुभवसिद्धता प्रसिद्धा। तुर्यावस्था तु वागतीता विरला च। स्वप्नावस्था विषये तु लोकेभिन्नभिन्नाः भावनाः भवन्ति। सुषुप्त्यपेक्षयापि बहूनां अनुभवो विषयः “स्वप्नः” भवति।

“प्रसुप्तस्य विज्ञानं स्वप्नः”[1] स्वप धातोः “स्वपो नन्” इति सूत्रेण नन् प्रत्यये प्रत्यये सति निष्पन्नस्य स्वप्न शब्दस्य अर्थाः निद्रा, रायन स्वाप, संवेग, तन्द्रा इत्थादयः सन्ति। मानसिकज्ञानभेदे इति वाचस्पत्ये, दर्शनमिति मेदिनी कोशो प्रोक्तम्।

सुप्तावस्थायां मानसिकप्रतिक्रियाः निरन्तरं चलन्ति तथा स्वप्नः तासांक्रियाणामेका नैरन्तर्थ प्रक्रिया भवति।[2] There is a continuity of mental activities during sleep and dream is merely a phase of this continuity of activities)- Fishen V.E

1. चरकसंहिता

2. Fisher VE – An Introduction to Abnormal Psychology Pg. No. - 403

ISSN:2277-7881; Impact Factor :8.017(2022); IC Value:5.16; ISI Value:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
DOI: http://ijmer.in.doi./2022/11.11.20.1.3.4
www.ijmer.in

"अचैतन्यावस्थां प्रति गन्तुं स्वप्नः एकः सुमार्गः"

Dream is the royal Road to the unconscious. – J.D.Page

"स्वप्नाः विभ्रमाः भवन्ति। येषामनुभवः प्रत्येकं रात्रौ जायते, परं यदा तद्विभ्रमस्यार्थावगमनं जायते तदा स्वप्नः स्पष्टः भवति।

Dreams are hallucinations which we all experience every night. When we awake their hallucinatory nature is quite obvious to us. - Brown J.F[1]

कोऽयं स्वप्नः? किं तस्य स्वरुपं द्रष्टा कः? इत्यादि विषयाणां विश्लेषणं न सर्वजन सुलभसाध्यम्। यतो हि प्रत्येकं वयः मानसिक – समाजिक – आर्थिकस्थितयः, विगतानुभवाः शैशव कालीन अनुभूतयः, दैहिकस्थितयः इत्यादिभिः अनेकैः कारणैः स्वप्नसामग्री एकरूपात्मिका न भवति।

पुनः एकस्यामेव व्यक्तौ बाल्यकिशोराद्यवस्थासु स्वप्न सामग्री परिवर्तिताः भवन्त्येव इति Kimmins महोदयस्य महत्वपूर्णाध्ययन द्वारा ज्ञायते। अतः स्वप्नस्वरूप निर्धारणे एकमतित्वं कुत्रापि न दृश्यते।

"स्वस्मिन् स्वीयभ्रमणं स्वप्नः" इति शाब्दिकार्थानुसारेण नैकविधस्वप्न सिद्धान्ताः आत्मानं प्रत्यक्षीकरणाय प्रतिपादिताः। तेषु स्वप्न सिद्धान्तेषु त्रयः सिद्धान्ताः प्रसिद्धाः।

1. पराप्राकृतिक स्वप्नसिद्धान्ताः
2. शारीरक स्वप्न सिद्धान्ताः
3. मनोवैज्ञानिकस्वप्नसिद्धान्ताः

---

1. Brown J.F – The Psychodynamics of Abnormal Behaviour – P. 221

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2022/11.11.20.1.3.4
www.ijmer.in

1. **पराप्राकृतिक स्वप्नसिद्धान्ताः** (Supernatural theories of Dreams)

चतुरशीतिलक्षयोनिषु जन्मान्तरं मुनुष्य जन्म लभ्यते। अतः प्राग्जन्म संस्काराणां पुनस्स्मरणमेव स्वप्नः इति केचन प्राचीनभारतीयाः अभिप्रयन्ति। अत एव जन्मना अन्धाः अपि पूर्वजन्मसंस्कारवशात् स्वप्नमनुभवन्ति इत्यपि उच्यते। तथैव जाग्रद्वासनामयैः मनः आदिभिः चतुदर्शकारणैः शब्दाद्यभावेऽपि वासनामयान् शब्दादीन् यदोपलभते तदात्मनः स्वप्नः इत्यपरः ब्रूते।

अग्निपुराणे शुभस्वप्नदुस्स्वप्न विवेचन पूर्वकं स्वप्नस्य आगत समयानुगुणं कदा कदा तस्य साकाररूपप्रत्यक्षं भवितुमर्हति, तद्वारा अभिज्ञायते यत् स्वप्नः नाम भविष्यद्घटना प्रदर्शकः इति।

स्वापकाले आत्मा शरीरात् पृथग्भूय सम्भ्रमति, तदानीं तेन यद्यद् दृश्यते तदात्मनः स्वप्नः इति। अत एव सुप्तपुरुषः अकस्मात् नोत्थापनीयः इति वदन्ति।

केचन सुस्वप्नः यदा आगमिष्यति तदा देवः प्रसन्नो भवेत्, यदि देवः अप्रसन्नः तर्हि दुस्स्वप्नः अनुभोक्तव्यः इति विश्वसन्ति।

2. **शारीरक स्वप्न सिद्धान्ताः** (Physiological theories of Dreams)

बिन्ज (Binz), मौरी (Mouri), रॉबर्ट (Robert), डीलिज् प्रभृतयः शारीरिक-स्वप्नसिद्धान्त प्रतिपादकाः वेविद्यन्ते।

एतेषां मते स्वप्नस्य कारणं बाह्य आन्तरिकोद्दीपकाः एव। निद्रावस्थायां चैतन्य शैथिल्यात् उच्चस्नायुमण्डलमपि निष्क्रिया रुपेण तिष्ठति। उत्तेजकानां प्रभावः यथा ज्ञानेद्रिये स्यात्, तथैव मस्तिष्केऽपि। अत एव सुप्तस्य आस्ये जलसेचनेन "नद्यां स्नानं कुर्वन्नस्मीति"

Cover Page

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881; Impact Factor :8.017(2022); IC Value:5.16; ISI Value:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2022/11.11.20.1.3.4
www.ijmer.in

स्वप्नः जायेत। तथैव स्वापकाले नाममात्रेण पर्यङ्कस्य सूत्रेण यदि स्वप्नद्रष्टुः पादः बद्धः तर्हि स्वयं कुत्रचिद् जले पतितवानस्मि इति स्वप्नः दृश्येत। बुभुक्षायां सत्यां स्वप्ने किमति खादामीति स्वप्नमनुभवेयुः।

निद्रावस्थायां विद्यमानः कश्चन पुरुषं सुरभिद्रव्यं आघ्रापयामास। प्रातरुत्थाय तेनोक्तं स्वप्ने अहं सुगन्ध द्रव्यापणं गत्वा सुरभितैलं क्रीतवानस्मि इति।

अतः पूर्वोक्तोदाहरणैः ज्ञायते यत् शारीरक आन्तरिक बाह्योद्दीपकैः समुत्पन्नाः संवेदनाः अनुभवाः वा वास्तविकज्ञाने अवास्तविकमिथ्थज्ञानं प्रकल्पयन्ति प्रदर्शयन्ति च।

3. **मनोवैज्ञानिक स्वप्नसिद्धान्ताः** (Psychological theories of Dreams)

सिग्मड् फ्रयिड (Freud) मते स्वप्नः एकः मनस्तापः। दमितेच्छानां परिपूर्तिं स्वप्ने एव सम्भवति। अतः स्वप्नः निद्रावस्थापर्यन्तः नैव सीमितः। अपि च स्वप्नः अचेतनादुत्पन्न स्वैरकल्पनायाः विभागः। जाग्रदवस्थायां स्वैरकल्पना अन्तर्मानसिकज्ञानस्य नियन्त्रेण तिष्ठति। निद्रावस्थायां तु तस्य क्षीणत्वात् साकारात्मिका भवति वस्तविकता काल्पनिकतयोः भेदं अनभिज्ञः पुरुषः काल्पानिकतायामेव वास्तविकतामनुभवन्ति। अतः स्वप्नद्दक्षु स्वीयेच्छापूर्तिः जायमानास्तीति सन्तृप्तिः सञ्जायते।

मनसि अनेके नैतिकानैतिकेच्छाः दमिताः भवन्ति। ताः दूरीकर्तव्याः, नोचेत् चित्तविभ्रमः भवेयुः। यथा बाष्पचुल्यन्तस्थः अधिकबाष्पवायुः Valve द्वारा बहिः प्रेष्यते। अन्यथा तस्य विस्फोटनं भवेत्। तथा स्वप्नः Safety valve कार्यं करोति।

अचैतन्यमनसि दमिताः इच्छाः स्वप्ने छद्मवेषं धृत्वा बहिरागच्छन्ति इति निरूपितवान् फ्रियड् महोदयः।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

इत्थं वैज्ञानिक दृष्ट्या प्रतिपादिताः प्रसुप्तस्य विज्ञानसिद्धान्ताःगच्छता कालेन अभिवृद्धिं गताः। परन्तु कोऽयं स्वप्नः? तस्य स्वरूपंकीदृशं? इत्यादि प्रश्नानां उत्तरं निर्दिष्टत्वेन न केनापि प्रतिपादितं इति कथने नास्ति विशंवादः। तथापि संक्षिप्तरूपेण वक्तुं शक्यते यत् –

"All our dreams are related to our suppressed emotions, fears, desires and needs." इति।

**आधारग्रन्थसूची –**

1. चरकसंहिता – राष्ट्रियसंस्कृतसंस्थान्, नवदहली
2. अग्निपुराणम् – चौखम्बा संस्कृतप्रष्ठानम् – दिल्ली
3. The Interpretation of Dreams – Sigmund Fred (1900)
4. Dream Phycology Psychoanalysis for Beginners – Sigmund Fred